शनिमृत्युञ्जयस्तोत्रम्

श्रीगणेशाये नमः ॐ नमोमृत्युञ्जयाये नमः नन्दिकेशर उवाच

कैलासस्योत्तरे शृङ्गे शुद्धफटिकसन्निभे ।
तमोगुणविहीने तु जरामृत्युविवर्जिते ॥१॥
सर्वार्थसंपदाधारे सर्वज्ञानकृतालये ।
कृताञ्जलिपुटो ब्रह्मा ध्यानासीनं सदाशिवम् ॥२॥
पप्रच्छ प्रणतो भूत्वा जानुभ्यामवनि गतः ।
सर्वार्थसम्पदाधार ब्रह्मा लोकपितामहः ॥३॥

ब्रमो वाच

केनोपायेन देवेश चिरायुर्लोमशोऽभवत् ।
तन्मेब्रुहि महेशान लोकानां हितकाम्यया ॥४॥

श्रीसदाशिव उवाच

शृणु ब्रह्मन् प्रवक्ष्यामि चिरायुर्मुनिसत्तमः ।
सञ्जातः कर्मणा येन व्यधिमृत्युविवर्जितः ॥५॥
तस्मिन्नेकार्णवे घोरे सलिलौघपरिप्लुते ।
कृतान्तभयेनाशाय स्तुतो मृत्युञ्जयः शिवः ॥६॥
तस्य संकीर्त्तनान्नित्यं मुनिमृत्युविवर्ज्जितः ।
तमेव कीर्तयन् ब्रह्मन् मृत्युजेतुं न संशयः ॥७॥

लोमश उवाच

ॐ देवाधिदेवदेवेश सर्वप्राणभृतांवर ।
प्राणिनामपि नाथस्त्वं मृत्युञ्जय नमोऽस्तु ते ॥८॥
देहिनां जीवभूतोऽसि जीवोजीवस्य कारणम् ।
जगतां रक्षकस्त्वं वै मृत्युञ्जय नमोऽस्तु ते ॥९॥

हेमाद्रिशिखराकार सुधावीचिमनोहर ।
पुण्डरीकपरंज्योति मृत्युञ्जय नमोऽस्तु ते ॥१०॥
ध्यानाधार महाज्ञान सर्वज्ञानैककारण ।
परित्रातासि लोकानां मृत्युञ्जय नमोऽस्तु ते ॥११॥
निहता येन कालेन सदेवासुरमानुषाः ।
गन्धर्वाप्सरसस्चैव सिद्धविद्याधरास्तथा ॥१२॥
साध्याश्च वसवो रुद्रास्तथाश्विनिसुतावुभौ ।
मरुतश्च दिशो नागाः स्थावरा जङ्गमास्तथा ॥१३॥
सर्वे देवास्वयं शंभु माता पिता स्वयंगुरु ।
जितःसोऽपि त्वया विश्वं मृत्युञ्जय नमोऽस्तु ते ॥१४॥
ये ध्यायन्त्ये परां मूर्तिपूजयन्त्यमरादय ।
न ते मृत्युवशं यान्ति मृत्युञ्जय नमोऽस्तु ते ॥१५॥
त्वमोङ्कारोऽसि वेदानां देवानां च सदाशिवः ।
आधारशक्तिः शक्तिनां मृत्युञ्जय नमोऽस्तु ते ॥१६॥
स्थावरे जङ्गमे वापि यावत्तिष्ठति देहगः ।
जीवत्यपत्यलोकोयं मृत्युञ्जय नमोऽस्तु ते ॥१७॥
सोमसूर्याग्निमध्यस्थ व्योवयापिन् सदाशिव ।
कालत्रय महाकाल मृत्युञ्जय नमोऽस्तु ते ॥१८॥
प्रबुद्धे चाप्रबुद्धे च त्वमेव सृजते जगत् ।
सृष्टिरूपेण देवेश मृत्युञ्जय नमोऽस्तु ते ॥१९॥
व्योम्नि त्वं वयोमरूपोऽसि तेजः सर्वत्र तेजसि ।
ज्ञानिनां ज्ञानरूपोऽसि मृत्युञ्जय नमोऽस्तु ते ॥२०॥

जगज्जीवो जगत्प्राणः स्रष्टा त्वं जगतः प्रभुः ।
कारणं सर्वतीर्थानां मृत्युञ्जय नमोऽस्तु ते ॥२१॥
नेता त्वमिन्द्रियाणां च सर्वज्ञानप्रबोधकः ।
सांख्ययोगश्च हंसश्च मृत्युञ्जय नमोऽस्तु ते ॥२२॥
रूपातीतः सरूपश्च पिण्डस्थपदमेव च ।
चतुयुगकलाधार मृत्युञ्जय नमोऽस्तु ते ॥२३॥
रेचके वन्हिरूपोऽसि सोमरूपोऽसिपूरके ।
कुम्भके शिवरूपोऽसि मृत्युञ्जय नमोऽस्तु ते ॥२४॥
क्षयङ्करोऽसि पापानां पुण्यानामपि पर्द्धनम् ।
हेतुस्त्वं श्रेयसां नित्यं मृत्युञ्जय नमोऽस्तु ते ॥२५॥
सर्वमायाकलातीत सर्वेन्द्रियपरावर ।
सर्वेद्रियकलाधीश मृत्युञ्जय नमोऽस्तु ते ॥२६॥
रूपं गन्धो रसः स्पर्शः शब्दः संकारएव च ।
त्वत्तः प्रकाश एतेषां मृत्युञ्जय नमोऽस्तु ते ॥२७॥
चतुर्विधानां सृष्टीनां हेतुस्त्वं कारणेश्वर ।
भावाभावपरिच्छिन्न मृत्युञ्जय नमोऽस्तु ते ॥२८॥
त्वमेको निष्कलो लोके सकलं भुवनत्रये ।
अतिसूक्ष्मातितिरूपस्त्वं मृत्युञ्जय नमोऽस्तु ते ॥२९॥
त्वं प्रबोधस्त्वमाधार त्वद्बीजं भुवनत्रयम् ।
सत्वं रजस्तमस्त्वं हि मृत्युञ्जय नमोऽस्तु ते ॥३०॥
त्वं सोमस्त्वं दिनेशश्च त्वमात्मा प्रकृतेः परः ।
अष्टात्रिंशत्कलानाथ मृत्युञ्जय नमोऽस्तु ते ॥३१॥

सर्वेन्द्रियाणामाधारः सर्वभूतगुणाक्षयः ।
सर्वज्ञानमयानन्त मृत्युञ्जय नमोऽस्तु ते ॥३२॥
त्वमात्मा सर्वभूतानां गुणानां त्वमधीश्वरः ।
सर्वानन्दमयाधार मृत्युञ्जय नमोऽस्तु ते ॥३३॥
त्वं यज्ञः सर्वयज्ञानां त्वं बुद्धिबोधलक्षणा ।
शब्दब्रह्मत्वमोङ्कर मृत्युञ्जय नमोऽस्तु ते ॥३४॥

श्रीसदाशिव उवाच

एवं सङ्कीर्त्तयेद्यस्तु शुचितद्गतमानसः ।
भक्त्या शृणोति यो ब्रह्मन् न स मृत्युवशो भवत् ॥३५॥
न च मृत्युभयं तस्य प्रातकालं च लङ्घयेत् ।
अपमृत्युभयं तस्य प्रणस्यति न संशयः ॥३६॥
व्याधयो नोपपद्यन्ते नोपसर्ग भयं भवेत् ।
प्रत्यासन्नान्तरे काले शतैकावर्तने कृते ॥३७॥
र्मत्युर्नजायते तस्य रोगान्मुञ्चति निश्चितम् ।
पञ्चम्यां वा दशम्यां वा पौर्णमास्या मथापिवा ॥३८॥
शतमावर्तयेद्यस्तु शतवर्षं स जीवति ।
तेजस्वी बलसम्पन्नो लभते श्रीयमुत्तमाम् ॥३९॥
त्रिविधं नाशयेत् पापं मनो वाक्कायसम्भवम् ।
अभिचाराणि कर्माणि कर्माण्यथर्वणानि च ।
क्षीयन्ते नात्र सन्देहो दुःस्वप्नश्च विनश्यति ॥४०॥
इदंरहस्यं परमं देवदेवस्यशूलिनः ।
दुःस्वप्ननाशनं पुण्यं सर्वविघ्नविनाशनम् ॥४१॥

इति श्री शिवब्रह्मसंवादे श्री मृत्युञ्जयस्तोत्रम् सपूर्णम्